श्री तुलसी स्तुतिः

तुलसि श्रीसखि शुभे पापहारिणि पुण्यदे |
नमस्ते नारदनुते नारायणमनःप्रिये ||1||

मनः प्रसादजननि सुखसौभाग्यदायिनि |
आधिव्याधिहरे देवि तुलसि त्वां नमाम्यहं ||2||

यन्मूले सर्वतीर्थानि यन्मध्ये सर्वदेवताः |
यदग्रे सर्व वेदाश्च तुलसि त्वां नमाम्यहं ||3||

अमृतां सर्वकल्याणीं शोकसंतापनाशिनीं |
आधिव्याधिहरीं नृणां तुलसि त्वां नम्राम्यहं ||4||

देवैस्त्वं निर्मिता पूर्वं अर्चितासि मुनीश्वरैः |
नमो नमस्ते तुलसि पापं हर हरिप्रिये ||5||

सौभाग्यं संततिं देवि धनं धान्यं च सर्वदा |
आरोग्यं शोकशमनं कुरु मे माधवप्रिये ||6||

तुलसी पातु मां नित्यं सर्वापद्भ्योऽपि सर्वदा |
कीर्तिताऽपि स्मृता वाऽपि पवित्रयति मानवं ||7||

या दृष्टा निखिलाघसंघशमनी स्पृष्टा वपुःपावनी
रोगाणामभिवंदिता निरसनी सिक्ताऽन्तकत्रासिनी |
प्रत्यासत्तिविधायिनी भगवतः कृष्णस्य संरोपिता
न्यस्ता तच्चरणे विमुक्तिफलदा तस्यै तुलस्यै नमः ||8||

इति श्री तुलसी स्तुतिः समाप्ता |